# A-III/1/22ADSS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## दर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. उपनिषत् इति पदस्य व्युत्पत्तिः का, अर्थश्च कः?
2. उपनिषदां प्रयोजनं लिखत।
3. प्रस्थानत्रयं किम्?
4. कृष्णयजुर्वेदीयाः उपनिषदः काः?
5. माण्डुक्योपनिषत् कस्मिन् वेदे अन्तर्भवति?
6. "तत्त्वमसि" इति महावाक्यं कस्याम् उपनिषदि वर्तते?
7. विशिष्टाद्वैतवेदान्तस्य प्रवर्तकः कः?
8. अविद्या का?
9. पूर्णप्रज्ञभाष्यस्य रचनाकारः कः?
10. वेदान्ते जगत्कारणं किम्?
11. किमर्थं मोक्षः परमपुरुषार्थः इत्युच्यते?
12. उत्तरमीमांसा इति अपरं नाम कस्य?
13. ब्रह्मसूत्रं केन रचितम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. उपनिषत्पदार्थं विशदयत।
15. वेदान्तो नाम उपनिषत् न वेति विचारयत।

16. द्वैतवेदान्तदिशा मोक्षं वर्णयत।
17. रामानुजवेदान्ते पदार्थत्रयं व्याख्यात।
18. अद्वैतवेदान्तानुसारं जीवब्रह्मैकत्वं प्रतिपादयत।
19. वेदान्तशास्त्रस्य प्रासङ्गिकत्वं निरूपयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. उपनिषद्वाङ्मयस्य परिचयं लिखत।
21. वेदान्ते विभिन्नशाखानां तुलनां कुरुत।
22. परिणाम–विवर्तयोः स्वरूपं विलिख्य जगत्सृष्टिं वर्णयत।

# A-III/2/22ADSS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## दर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. योगशब्दस्य कः अर्थः ?
2. आकाशगमनं कथं भवति ?
3. योगसूत्रे कति पादाः सन्ति, के च ते ?
4. योगदर्शने ईश्वरः कः ?
5. व्यासभाष्यस्य रचनाकारः कः ?
6. ध्यानं नाम किम् ?
7. योगदर्शने विभूतिपदेन किमभिधीयते ?
8. परिणामान्यत्वे हेतुः कः ?
9. असम्प्रज्ञातः नाम किम् ?
10. कस्मात् चित्तस्य परशरीरावेशः भवति ?
11. योगस्य प्रयोजनं लिखत।
12. योगदर्शने धर्मः कः ?
13. योगदर्शने मोक्षसाधनं किम् ?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. योगदर्शनस्य वैदिकत्वं निरूपयत।

15. 'देशबन्धश्चित्तस्य धारणा' इति सूत्रं व्याख्यात।

16. योगिनः अतीतानागज्ञानं कथं भवति? विचारयत।

17. 'मूर्द्धज्योतिषि सिद्धदर्शनम्' इति सूत्रं विवेचयत।

18. आधुनिकयुगे मनोनिर्वहणे योगदर्शनस्य साधनत्वं प्रदर्शयत।

19. महर्षिपतञ्जलिपरिचयं लिखत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. योगदर्शनस्य विकासपरम्परां प्रदर्श्य तस्य प्रस्तुततां निरूपयत।

21. पातञ्जलदर्शने विभूतियोगं विशदयत।

22. योगदर्शनदिशा पुरुषार्थं विमृशत।

# A-III/3/22ADSS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## दर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. सांख्यदर्शनस्य प्रवर्तकः कः?
2. सांख्यपदस्य व्युत्पत्तिं लिखत।
3. सांख्यतत्त्वकौमुदी केन रचिता?
4. विज्ञानभिक्षोः रचनाद्वयं लिखत।
5. 'नास्ति सांख्यसमं ज्ञानम्' इति वाक्यं कुत्रस्थम्?
6. सांख्यतत्त्वानां विवेचनं महाभारतस्य केषु पर्वसु लभ्यते?
7. 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां श्रुणु' इति वाक्यं कुत्रस्थम्?
8. सांख्यप्रवचनभाष्ये आख्यायिकाः किं बोधयन्ति?
9. कस्य आवृत्तिः करणीया?
10. असाधनानुचिन्तनस्य फलं किम्?
11. प्रमाणाभावान्न तत्सिद्धिः इत्यस्य अर्थः कः?
12. असङ्गित्वं कस्य स्वभावः?
13. सांख्ये मोक्षस्वरूपं किम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. कपिलमुनेः परिचयं लिखत।
15. 'संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते' इति वाक्यं विचारयत।

16. सत्कार्यवादं निरूपयत।

17. त्रिगुणात्मिका प्रकृतिः का ?

18. सांख्यप्रवचनभाष्यदिशा ईश्वरस्य अधिष्ठातृत्वं निराकुरुत।

19. राजपुत्रवत् तत्त्वोपदेशात् इत्यस्य अर्थं वर्णयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. सांख्यदर्शनस्य विकासपरम्परां विवृणुत।

21. महाभारते श्रीमद्भागवते च वर्णितान् सांख्यदर्शनसिद्धान्तान् विचारयत।

22. सांख्यप्रवचनभाष्यस्थाः काश्चन आख्यायिकाः ससिद्धान्ताः विशदयत।

# A-III/4/22ADSS3CCTC4/23

## तृतीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-27)

## दर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. प्रमाणं नाम किम्?
2. त्रिविधम् अनुमानं लिखत।
3. उपमानस्य उदाहरणमेकं प्रदर्शयत।
4. अदृष्टार्थः शब्दः कथं प्रमाणं भवति?
5. वादः कः?
6. प्रतिपक्षस्थापनाहीनः कः?
7. न्यायवैशेषिकदर्शनयोः निःश्रेयसस्वरूपं किम्?
8. न्यायवैशेषिकदर्शनयोः त्रिविधा शास्त्रप्रवृत्तिः का?
9. आत्ममनसोः सन्निकर्षाभावे किं नोत्पद्यते?
10. आन्वीक्षिकी विद्या का?
11. न्यायदर्शने कति पदार्थाः?
12. ईश्वरानुमानं लिखत।
13. योगदर्शने ईश्वरः कः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. अनुमानप्रमाणं विचारयत।
15. आरम्भवादः कः?

16. कथात्रैविध्यं प्रतिपादयत।

17. वैशेषिकदर्शने पदार्थविचारं कुरुत।

18. हेत्वाभासं सप्रकारं विवृणुत।

19. वादे निग्रहस्थानानि कानि?

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. न्यायवैशेषिकयोः समानतन्त्रत्वं निरूपयत।

21. दर्शनान्तरेषु ईश्वरस्वरूपं प्रतिपाद्य न्यायवैशेषिकोक्तं तत्स्वरूपं वर्णयत।

22. न्यायवैशेषिकदिशा वादसिद्धान्तान् विचारयत।